MEDHĀMANTHAN ISSN : 3139-7840
A premier peer-reviewed, open-access, bimonthly online research journal
dedicated to the fields of Arts, Humanities, and Social Sciences
Volume: 1, Issue: 1 (MAY - JUN) 2026

# Reflections on Tiṅ-Tattva from the Perspective of Śabdārtharatna
# शब्दार्थरत्नस्थदिशा तिङ्-तत्त्वविमर्शः

**Dr. Pintu Raul**
*State Aided College Teacher, Dept. of Sanskrit,*
*Sitananda College, Nandigram, Purba Medinipur, West Bengal, India.*
*Email: raulpintu@gmail.com*
*Page No: 10-20*

***Abstract:*** *In my research paper, the verbal suffix 'Tiṅ' is presented. Since a word is defined as the combination of a base and a suffix (prakṛti-pratyaya-samudāyaḥ), it is essential to explain the different types of bases and suffixes as well. Bases are of two types: nominal bases (nāma) and verbal roots (dhātu). Similarly, suffixes are also twofold: nominal suffixes (sup) and verbal suffixes (tiṅ). Here, the true nature and characteristics of tiṅ are discussed. In this context, the ten tenses/ moods (daśa lakārāḥ) are examined. Following this, the concept of time (kāla-tattva) is presented. While explaining the concept of time, the viewpoints of Nāgeśa Bhaṭṭa and Kauṇḍa Bhaṭṭa have also been delineated.*

***Keywords:*** *Tiṅ-pratyayaḥ, Kālaḥ, Śabdārtharatnam, Daśa lakārāḥ, Ākhyātaḥ.*

**तिङ्-स्वरूपविवेचनम्—**

आख्यातशब्दस्य बहुविधः अर्थः शास्त्रेषु विद्यते। यथा— "आख्यातमाख्यातेन क्रियासातत्ये"[1] इत्यस्मिन् वार्त्तिके आख्यातशब्देन तिङन्तस्य ग्रहणं भवति। वार्त्तिकार्थः एवं भवति यत्, तिङन्तं तिङन्तेन सह समस्यते क्रियासातत्ये गम्यमाने इति। तेन पचतभृज्जता इत्यादीनां सिद्धिर्भवति। क्वचित् तु "भावप्रधानमाख्यातम्"[2] इत्यादौ यास्कवचने आख्यातपदेन धातोः ग्रहणं भवति। अत एव आचार्येण नागेशेन वैयाकरणसिद्धान्तलघुमञ्जूषायामुक्तम्— "आख्यातपदेन धातुः, आख्यायते सर्वप्रधानीभूतोऽर्थोऽनेनेति व्युत्पत्तेः"[3] इति। क्वचिच्च आख्यातपदेन तिङ्-प्रत्ययानां ग्रहणं भवति। तथा चाह आचार्यः जगदीशः शब्दशक्तिप्रकाशिकायां—

"धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाऽऽख्यातमुच्यते"॥[4] इति।

अस्य श्लोकस्य व्याख्यावसरे आचार्यः जगदीशः वृत्तौ आह— "तिङाख्यातयोः पर्य्यायत्वात्"[5] इति। एवञ्च आख्यातपदेन क्वचित् तिङन्तस्य, क्वचित् धातोः, क्वचिच्च तिङ्-प्रत्ययस्य ग्रहणं भवति। मया तु अस्मिन् अध्याये तिङ्-प्रत्ययानामर्थस्य विमर्शः विवक्षितः।

स्वभिन्नप्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधं प्रति समर्थाः प्रत्ययाः तिङः उच्यन्ते। एवं तिङं लक्षयति विभजते च आचार्यः जगदीशः—

"स्वेतरप्रथमान्तस्य नाम्नोऽर्थे बोधनक्षमाः।
प्रत्ययाः स्वार्थसंख्यायास्तिङो दशविधाश्च ताः"॥[6] इति।

एवम् आचार्येण तारानाथ-भट्टाचार्येणापि आचार्यस्य जगदीशस्य मतानुसारं लकारः दशविधः स्वीकृतः। तथा च लकारः द्विविधः भवति टित् ङित् चेति। टित्-लकारः षड्विधः लट्-लिट्-लुट्-लृट्-लेट्-लोट्भेदात्। ङित्-लकारश्च चतुर्विधः लङ्-लिङ्-लुङ्-लृङ्भेदात्। एवं टित्-लकारं ङित्-लकारञ्च समाश्रित्य लकारः दशविधः। आचार्यः कौण्डभट्टः दशलकाराणामर्थमुपस्थापयति—

"वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति।
विध्यादौ प्रार्थनादौ च क्रमाज्ज्ञेया लडादयः"॥[7] इति।

"ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः।

सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः" ॥[8] इति।

अर्थात् वर्तमाने लट्, परोक्षभूते लिट्, श्वः भाविनि लुट्, सामान्यभविष्यति लृट्, विध्यादौ लेट्, प्रार्थनादौ लोट् इति लडादयः षट् बोध्याः। एवञ्च अनद्यतनभूते लङ्, प्रेरणादौ लिङ्, सामान्यभूते लुङ्, क्रियातिपत्तौ भूते भाविनि च लृङ् चेति लङादयः चत्वारः बोध्याः।

सम्प्रति ग्रन्थानुसारं दशलकाराणां स्वरूपं क्रमेण प्रस्तूयते।

**लट्-लकारविवेचनम्—**

"स्मयोगाभावतः स्वार्थातीतत्वानवबोधिका"[9] इति वचनात् लट् उच्यते यादृशतिङः स्मशब्दोपसन्धानाभावप्रयुक्तः स्वार्थातीतत्वबोधकत्वाभावस्तादृशी तिङ्। अर्थात् लटः वर्तमानत्वमेव प्रतीयते। आचार्यः जयकृष्णशर्मापि लट्-लकारस्य अर्थं निरूपयामास। तथा च– "तत्र लटो वर्तमानत्वमर्थः"[10] इति। अर्थात् लटः वर्तमानत्वमर्थो भवति। एवम् आचार्यः तारानाथोऽपि आह— "लटो वर्तमानोऽर्थः"[11] इति। एतत् सर्वं तु पाणिनिसम्मतं वर्त्तते। अत्र मानं तावत्— "वर्तमाने लट्" (पा. सू. ३-२-१२३) इति सूत्रम्।

लट्-लकारादीनां सामान्यविशेष्यभेदेन द्विविधः अर्थः विद्यते। लादेशस्य एकत्वादिसंख्याविशेषः, कर्तृकर्मान्यतरकारकधात्वर्थविशेषः इत्येते लडादीनां सामान्यार्थाः। सर्वेषु लकारेषु एतेषाम् अर्थानां विद्यमानत्वात् साधारणार्थत्वेन परिगण्यते। परन्तु वर्तमानत्वम् इति अर्थः असाधारणः। यतो हि केवलं लट्-लकारेणैव तस्य प्रतीतिर्भवति। अत एव आचार्यः तारानाथ-भट्टाचार्यः वर्तमानत्वमिति विशेषार्थं प्राह।

आचार्यः नागेशः वर्तमानकालस्य लक्षणं प्राह— "वर्तमानकालत्वञ्च प्रारब्धापरिसमाप्तक्रियोपलक्षिततत्वम्"[12] इति। अर्थात् प्रारब्धा च अपरिसमाप्ता च या क्रिया, तादृशक्रियोपलक्षितत्त्वमिति। अत्र उपलक्षितत्त्वम् इत्युक्ते आश्रयत्वमिति। तथा च प्रारब्धापरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वमिति फलितम्। तच्च उदाहरणेन स्पष्टीक्रियते— 'देवदत्तः पचति' इत्यादौ पाकानुकूलक्रिया प्रारब्धा परन्तु नैव परिसमाप्ता, तादृशक्रियायाः आश्रयभूतः यः कालः स एव वर्तमानकालः बोध्यः।

वर्तमानकालविषये आचार्यः कौण्डभट्टः लक्षणमाह— "प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्"[13] इति। एवं वैयाकरणभूषणसारे आचार्येण कौण्डभट्टेन वर्तमानकालस्य लक्षणद्वयमुपस्थापितम्। वर्तमानकालस्य प्रथमं लक्षणं तावत्– 'प्रारब्धापरिसमाप्तत्वमिति'। अस्यार्थो भवति प्रारब्धापरिसमाप्त-क्रियोपलक्षिततत्वमिति। अर्थात् प्रारब्धा च अपरिसमाप्ता च या क्रिया, तादृशक्रियोपलक्षिततत्वमिति। अत्रापि उपलक्षिततत्वम् इत्युक्ते आश्रयत्वमिति बोध्यम्। तेन प्रारब्धापरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वमिति निष्कर्षोऽर्थः। यथा— 'देवदत्तः पचति' इत्यादौ पाकानुकूलक्रिया प्रारब्धा, परन्तु नैव परिसमाप्ता, तादृशक्रियायाः आश्रयभूतः यः कालः स एव वर्तमानकालः। द्वितीयं तावत्–- 'भूतभविष्यद्भिन्नत्वमिति'। भूतत्वं नाम विद्यमानध्वंसप्रतियोगित्वम्, भविष्यत्त्वं नाम वर्तमानप्रागभावप्रतियोगि-समयोत्पत्तिमत्त्वम्, एतदुभयभिन्नत्वं वर्तमानत्वमिति भावः। एतल्लक्षणं तु भाष्यसम्मतमस्ति, यतो हि भाष्यकारेण उक्तमस्ति यत्– "भूतभविष्यत्प्रतिद्वन्द्वो वर्तमानः"[14] इति।

'आत्मा अस्ति', 'पर्वताः तिष्ठन्ति' इत्यादौ पर्वतादीनां सदा विद्यमानत्वान्नित्यप्रवृत्तवर्तमानकालस्य उदाहरणत्वेन परिगण्यते। अत्र शङ्का उदेति यत्, पर्वतादीनां नित्यत्वं विद्यमानत्वञ्चास्ति चेत् पर्वताः तस्थुः स्थास्यन्ति इत्यादिभूतभविष्यद्व्यवहारः कथम्? तदा समाधीयते यत्, पर्वताः यद्यपि सदा विद्यमानात् नित्याः तथापि तत्तत्कालिकमुख्यनराधिपतीनां कालाधारेण भूतभविष्यद्व्यवहारः सम्भवति। महाभाष्यकारोऽपि "वर्तमाने लट्" (पा. सू. ३-२-१२३) इति सूत्रभाष्ये आह— "इह भूतभविष्यद्वर्त्तमानानां राज्ञां क्रियास्तिष्ठतेरधिकरणम्" इति। अर्थात् राज्ञां भूतभविष्यत्कालः पर्वतादिषु आरोप्य भूतभविष्यत्प्रयोगः। एवं वाक्यपदीयेऽपि भर्तृहरिणा प्रोक्तं—

"परतो भिद्यते सर्वमात्मा तु न विकम्पते।
पर्वतादिस्थितिस्तस्मात् पररूपेण भिद्यते" ॥[15] इति।

'देवदत्तः तण्डुलं पचति' इत्यत्र तण्डुलपदेन तण्डुलपदार्थोपस्थितिः। द्वितीयया कर्मतारूपफलोपस्थितिः। तत्र कर्मत्वे

तण्डुलपदार्थस्य वृत्तित्वसम्बन्धेन अन्वयः भवति। तेन तण्डुलवृत्तिकर्मत्वमिति बोध्यते। पच्-धातुना पाकोपस्थितिः बोध्या। पाको नाम विक्लित्त्यनुकूलव्यापारः। अत्र पाके अनुकूलत्वसम्बन्धेन तादृशकर्मताया अन्वयः भवति। तेन तण्डुलवृत्तिकर्मतानुकूलपाकः इति बोधः। लट्-लकारस्य अर्थः वर्तमानकालः, कृतिः, एकत्वसंख्या चेति। वर्तमानकालस्य कृतौ अवच्छेद्यत्वसम्बन्धेन अन्वयः। एवञ्च कृतौ व्यापारस्य अनुकूलत्वसम्बन्धेन अन्वयः भवति। देवदत्तपदात् देवदत्तपदार्थोपस्थितिः बोध्या। कृतेश्च आश्रयत्वसम्बन्धेन देवदत्ते अन्वयः। एकत्वसंख्यायाः अपि देवदत्ते अन्वयः भवति। अत एव तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलवर्तमानकालावच्छिन्नकृत्याश्रयः एकत्ववान् देवदत्तः इति बोधः।

**लिट्-लकारविवेचनम्—**

लिट्[16]-लकारस्य कोऽर्थः इति जिज्ञासायां समाधत्ते आचार्यः तारानाथ-भट्टाचार्यः "लिटोऽनद्यतनभूतत्वं परोक्षं चार्थः"[17] इति। मतमिदं पाणिनिसम्मतं विद्यते। अत्र मानं "परोक्षे लिट्" (पा. सू. ३-२-११५) इति सूत्रम्। "भूतत्वं नाम वर्तमानध्वंसप्रतियोगित्वम्"[18] इति। परोक्षत्वविषये शास्त्रकाराणां मतानि भिन्नानि सन्ति। तथाहि केचन वदन्ति परोक्षत्वं तु वर्षशतवृत्तित्वम्। केचित् कथयन्ति परोक्षत्वं वर्षसहस्रवृत्तित्वम्। केचित् वदन्ति द्व्यहवृत्तित्वं त्र्यहवृत्तित्वम्। किन्तु एते पक्षाः नैव सिद्धान्तभूताः विद्यन्ते। तर्हि परोक्षत्वस्य सर्वसम्मतं सिद्धान्तं किमिति चेदुच्यते प्रयोक्तुरिन्द्रियागोचरत्वं परोक्षत्वम्। अत एव प्रायः सर्वैः इदमेव मतं स्वभाषया प्रकटीतम्। तथा च आचार्यः कौण्डभट्टः आह— "परोक्षत्वं च साक्षात्करोमीत्येतादृशविषयताशालिज्ञानाविषयत्वम्"[19] इति। आचार्यः नागेशभट्टः आह— "परोक्षत्वं च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम्"[20] इति। एवञ्च वैयाकरणसिद्धान्तलघुमञ्जूषायामपि उक्तम् आचार्येण नागेशेन– "एवं भूतानद्यतनपरोक्षार्थकाल्लिट्। पपाचेत्यादितो बोधे तत्तद्विषयसन्देहानुदयात् भूतत्वादेरिवानद्यतनत्वादेरपि बोधविषयत्वम्। साक्षात्करोमीत्येतादृशविषयता-शालिज्ञानत्वं ज्ञाननिष्ठमपरोक्षत्वम्। तद्विषयत्वं चार्थनिष्ठम्। तद्भिन्नं च परोक्षत्वम्"[21] इति। अर्थात् परोक्षत्वं नाम चक्षुरादीन्द्रियाणामविषयत्वं साक्षात्कारभिन्नविषयत्वं वा। एवम् आचार्येण तारानाथ-तर्कवाचस्पतिना सिद्धान्तितं— "पारोक्ष्यन्तु साक्षात्करोमीत्या-दिज्ञानाविषयत्वम्"[22] इति। अर्थात् चक्षुरादीन्द्रियेण विषयस्य साक्षात्कारः यत्र न भवति तत्र लिट्-लकारस्य प्रयोगः भवति। अत्र एतदपि स्मर्तव्यं यत्, अतीतकालः अद्यतनानद्यतनभेदेन द्विविधः। तस्मात् अनद्यतनातीतत्वं परोक्षत्वञ्च लिट्-लकारस्य अर्थः भवति। अधुना एका शङ्का उदेति यत्, परोक्षत्वं नाम व्यापारविशिष्टकर्तुः चक्षुरादीन्द्रियेण विषयस्य साक्षात्काराभावत्वम्। उत्तमपुरुषप्रयोगे तु व्यापारविशिष्टकर्त्रा सह विषयस्य साक्षात्कारवशात् लिट्-लकारस्य प्रयोगः तत्र कथम्? तदोच्यते यत्, चित्तव्यासङ्गात् लिट्-लकारस्य प्रयोगः भवति। तेन चित्तव्यासङ्गात् साक्षात्करोमीत्यादिज्ञानाविषयत्वमिति सम्भवति।

'देवदत्तः मन्दिरं जगाम' इत्यत्र मन्दिरपदात् मन्दिरपदार्थोपस्थितिः। तत्र अम्-विभक्तेः अर्थः कर्मत्वं विद्यते। कर्मत्वे मन्दिरस्य वृत्तित्वसम्बन्धेन अन्वयः। तेन मन्दिरवृत्तिकर्मत्वमिति बोधः। गम्धातोः अर्थः गमनम्। तत्र गमने तादृशकर्मत्वस्य अनुकूलसम्बन्धेन अन्वयः। तेन मन्दिरवृत्तिकर्मतानुकूलगमनम् इति जायते। गम्-धातूत्तरलिटः अनद्यतनत्वं, परोक्षत्वम्, अतीतत्वं कृतिश्चार्थः भवति। व्यापारस्य कृतौ अनुकूलत्वसम्बन्धेन अन्वयः भवति। तेन मन्दिरवृत्तिकर्मतानुकूलगमनानुकूलकृतिः इति बोधः। एवञ्च कृतौ एव च लिडर्थस्य भूतत्वस्य अनद्यतनत्वस्य परोक्षत्वस्य च अन्वयः। देवदत्तपदात् देवदत्तपदार्थोपस्थितिः। तादृशकृतेश्च प्रथमान्तार्थे देवदत्ते आश्रयत्वसम्बन्धेन अन्वयः। एकत्वसंख्यायाः अपि देवदत्ते अन्वयः भवति। अतः मन्दिरवृत्तिकर्मतानुकूलगमनानुकूलानद्यतनातीतपरोक्षकृत्याश्रयः एकत्ववान् देवदत्तः इति बोधः।

**लुट्-लकारविवेचनम्—**

आचार्यः तारानाथः 'शब्दार्थरत्नम्' इति ग्रन्थे लुट्-लकारस्य अर्थमाह— "लुटोऽनद्यतनभावित्वम्"[23] इति। अर्थात् लुटः भविष्यत्वमर्थो भवति। अत्र च पाणिनीयसूत्रं मानमस्ति— "अनद्यतने लुट्" (पा. सू. ३-३-१५) इति। सूत्रेऽस्मिन् "भविष्यति गम्यादयः" (पा. सू. ३-३-३) इत्यस्मात् सूत्रात् 'भविष्यति' इति पदमनुवर्तते। तेन अस्य सूत्रस्य अर्थो भवति— भविष्यत्यनद्यतने अर्थे लुट् भवति। अत्रापि भविष्यत्त्वं द्विविधम् अद्यतनत्वम् अनद्यतनत्वञ्चेति। अनद्यतने भविष्यति अर्थे लुट्-लकारस्य प्रयोगः

MEDHĀMANTHAN ISSN : 3139-7840
A premier peer-reviewed, open-access, bimonthly online research journal
dedicated to the fields of Arts, Humanities, and Social Sciences
Volume: 1, Issue: 1 (MAY - JUN) 2026

भवति। तत्र किं नाम अनद्यतनत्वम् इति जिज्ञासायां समाधीयते यत्, अद्यतनभिन्नः कालः अनद्यतनो भवति। अर्थात् अद्यतनभिन्नकालत्वमिति। तत्र अद्यतनत्वम् इत्युक्ते किमिति जिज्ञासायां "लुङ्" (पा. सू. ३-२-११०) इति सूत्रभाष्ये कैयटः आह— "अतीतरात्रेरन्त्ययामेन आगामिरात्रेराद्ययामेन सहितो दिवसः अद्यतनः" इति। एवञ्च "कालोपसर्जने च तुल्यम्" (पा. सू. १-२-५७) इति सूत्रभाष्येऽपि उक्तम्— "अतीतायाः रात्रेः पश्चार्धेनागामिन्याः पूर्वार्धेन सहितो दिवसोऽद्यतनः" इति। एतत्कालभिन्नकालः अनद्यतनकालः इति भावः। आचार्यस्य नागेशभट्टस्यापि एवम् अभिप्रायोऽस्ति— "अतीतरात्रेः पश्चादर्द्धेन, आगामिन्याः पूर्वार्द्धेन च सहितः कालः अद्यतनः, तद्भिन्नः अनद्यतनः"[24] इति। आचार्यः जयकृष्णः लुडर्थमाह— "लुट्लृटोः भविष्यत्वमर्थः"[25] इति। आचार्यः जगदीशोऽपि प्राह— "धात्वर्थे श्वस्तनत्वस्य बोधिका तिङ् लुडुच्यते"[26] इति।

'चैत्रः ग्रामं गन्ता' इत्यत्र ग्रामपदात् ग्रामपदार्थोपस्थितिः। तदुत्तरद्वितीयया तु कर्मत्वोपस्थितिः। तत्र कर्मत्वे वृत्तित्वसम्बन्धेन ग्रामस्य अन्वयः। तेन ग्रामवृत्तिकर्मत्वमिति। गम्-धातुना गमनोपस्थितिः। तदुत्तरलुटः भविष्यत्त्वम्, अनद्यतनत्वं कृतिश्चार्थः विद्यते। तादृशकर्मतायाः अनुकूलत्वसम्बन्धेन गमने अन्वयः भवति। तेन ग्रामवृत्तिकर्मतानुकूलगमनम् इति बोधः। तादृशगमनस्य च तिङर्थकृतौ अनुकूलत्वसम्बन्धेन अन्वयः। कृतौ एव च लुडर्थस्य भावित्वस्य अनद्यतनत्वस्य अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलानद्यतनभाविकालिककृतिः इति बोधः। तिङर्थकृतेश्च आश्रयत्वसम्बन्धेन प्रथमान्तार्थे चैत्रे अन्वयः। एकत्वसंख्याया अपि चैत्रे अन्वयः भवति। अतः ग्रामवृत्तिकर्मतानुकूल-गमनानुकूलानद्यतनभाविकालिक-कृत्याश्रयः एकत्ववान् चैत्रः इति बोधः।

**लृट्-लकारविवेचनम्—**

लृट्-लकारघटितप्रयोगः भूयशः दरीदृश्यते। तत्र लृटः[27] कोऽर्थः इति जिज्ञासायाम् आचार्यः तारानाथ-तर्कवाचस्पतिः आह— "लृटो भविष्यत्त्वमात्रमर्थः, लृट् शेषे च इति सूत्रात्"[28] । अत्र मात्रशब्देन भविष्यत्सामान्यार्थः अवगम्यते। "लृट् शेषे च" (पा. सू. ३-३-१३) इत्यस्मिन् सूत्रे "भविष्यति गम्यादयः" (पा. सू. ३-३-३) इत्यस्मात् सूत्रात् भविष्यति इति पदमनुवर्तते। तेन भविष्यत्सामान्यार्थे लृटः प्रयोगः भवति। "अनद्यतने लुट्" (पा. सू. ३-३-१५) इत्यनेन सूत्रेण भविष्यत्यनद्यतने अर्थे लुटः प्रयोगः भवति। परन्तु लृट्-लकारः भविष्यत्यनद्यतनाद्यतनयोः अर्थयोः प्रयोगः भवति। अतः आचार्यः नागेशभट्टः लृटं लक्षयति— "लृड्विङस्तु भविष्यत्सामान्यमर्थः"[29] इति। आचार्यः जयकृष्णशर्मापि आह— "लुट्लृटोः भविष्यत्त्वमर्थः"[30] इति।

'देवदत्तः तण्डुलं पक्ष्यति' इत्यत्र तण्डुलपदेन तण्डुलपदार्थोपस्थितिः भवति। द्वितीयया कर्मतारूपफलोपस्थितिर्भवति। तण्डुलपदार्थस्य कर्मत्वे वृत्तित्वसम्बन्धेन अन्वयः। तेन तण्डुलवृत्तिकर्मत्वमिति। पच्-धातुना पाकोपस्थितिः। लृडर्थो भविष्यत्कालः, कृतिश्चार्थो भवति। पाको नाम विक्लित्त्यनुकूलव्यापारः। पाके अनुकूलत्वसम्बन्धेन तादृशकर्मतायाः अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाक इति। तादृशपाकस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयः भवति। तस्य च भविष्यत्कालस्य कृतौ अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूलभविष्यत्कालिककृतिः इति। देवदत्तपदात् देवदत्तपदार्थोपस्थितिः। कृतेश्च आश्रयत्वसम्बन्धेन देवदत्ते अन्वयः। एकत्वसंख्यायाः अपि देवदत्ते अन्वयः। तेन तण्डुलवृत्तिकर्मतानुकूलपाकानुकूल-भविष्यत्कालावच्छिन्नकृत्याश्रयः एकत्ववान् देवदत्तः इति बोधः।

**लेट्-लकारविवेचनम्—**

लौकिके तु लेट्-लकारस्य प्रयोगः नैव दृश्यते। लेटः प्रयोगस्तु छन्दस्येव। लेट्-लकारस्य कोऽर्थः इति जिज्ञासायाम् आचार्यः तारानाथ-तर्कवाचस्पतिः आह— "लेटो विध्याद्योऽर्थाः"[31] इति। "लिङर्थे लेट्" (पा. सू. ३-४-७) इत्यनेन सूत्रेण छन्दसि लिङर्थे एव लेट्-लकारस्य प्रयोगः जायते। अर्थात् छन्दसि इत्युक्ते वेदे लिङर्थे लेट्-लकारः प्रयुज्यते। "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" (पा. सू. ३-३-१६१) इति पाणिनीयसूत्रेण विधिनिमन्त्रणादिषु अर्थेषु एव विधिलिङ्-लकारः प्रयुज्यते। एष्वर्थेषु अपि लेट्-लकारस्य प्रयोगः वेदे भवति। प्रक्रियायामपि लेट्-लकारस्य प्रयोगः लट्-लकारवत् भवति। विशेषस्तु लेट्-लकारे अडाटौ भवतः। यथा— लट्-लकारे 'भवति' इति प्रयोगः जायते, एवं लेट्-लकारे तु 'भवाति' इति प्रयोगः जायते। लेट्-लकारविषये आचार्यः जगदीशः न किमपि अवदत्।

**लोट्-लकारविवेचनम्—**

"लोटः प्रार्थनादयोऽर्थाः"[32] इति तु आचार्यस्य तारानाथमहाभागस्य अभिमतम्। एवम् आचार्येण नागेशेनापि प्रोक्तं— "लोड्विङस्तु विध्यादिरर्थः"[33] इति। उभयमपि मतं समानम्। अतः आचार्यः तारानाथः आह– "लिङर्थान् विध्यादीनभिधाय लोट् च इति सूत्रेण विध्याद्यर्थेष्वेव तस्य विधानात्"[34] इति। अर्थात् "विधिनमन्त्रणामन्त्रणाधीष्ट-सम्प्रश्नप्रार्थनेषु लिङ्" (पा. सू. ३-३-१६१) इत्यस्मात् सूत्रात् लिङं विहाय सम्पूर्णं सूत्रम् अनुवर्तते "लोट् च" (पा. सू. ३-३-१६२) इत्यस्मिन् सूत्रे। तेन विध्यादिषु लोट्-लकारः प्रयुज्यते। आचार्येण भट्टोजिदीक्षितेन अस्य सूत्रस्य अर्थः कृतः— "विध्यादिष्वर्थेषु धातोर्लोट् स्यात्"[35] इति। एवञ्च "आशिषि लिङ्लोटौ" (पा. सू. ३-३-१७३) इति सूत्रमपि वर्त्तते। अस्य सूत्रस्य अर्थो भवति लिङ्लोटः आशीरप्यर्थो विद्यते। अतः लोट्-लकारस्य विध्यादयः आशीश्च अर्थाः सन्ति। न्यायानुसारं तु लोटः[36] भविष्यत्वमपि अर्थः विद्यते। तथा च आह आचार्यः जयकृष्णशर्मा— "लोटः भविष्यत्त्वम्, आशीः प्रेरणा च"[37] इति।

'देवदत्तः ग्रामं गच्छतु' इत्यत्र ग्रामपदेन ग्रामपदार्थोपस्थितिः जायते। द्वितीयया कर्मत्वरूपफलोपस्थितिः। तेन ग्रामस्य कर्मत्वे वृत्तित्वसम्बन्धेन अन्वयः भवति। तेन ग्रामवृत्तिकर्मत्वमिति बोधः। गम्-धातोः गमनमर्थः। गम्-धातूत्तरतिङश्च विधित्वं कृतिश्चार्थः भवति। गमने ग्रामवृत्तिकर्मत्वस्य अनुकूलत्वसम्बन्धेन अन्वयः। एवञ्च धात्वर्थे गमने विधेः विषयतासम्बन्धेन अन्वयः भवति। तादृशगमनस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलविधिविषयक-गमनानुकूलावच्छिन्नकृतिः इति बोधः। देवदत्तपदेन देवदत्तपदार्थोपस्थितिः। तादृशकृतेः आश्रयत्वसम्बन्धेन देवदत्ते अन्वयः। एकत्वसंख्याया देवदत्ते अन्वयः भवति। तेन ग्रामवृत्तिकर्मतानुकूलविधिविषयकगमनानुकूलावच्छिन्नकृत्याश्रयः एकत्ववान् देवदत्तः इति बोधः जायते।

**लङ्-लकारविवेचनम्—**

लङर्थं[38] वर्णितुम् आचार्यः तारानाथः आह— "लङोऽनद्यतनभूतत्वमर्थः"[39] इति। अत्र तु पाणिनीयसूत्रमेव प्रमाणम्— "अनद्यतने लङ्" (पा. सू. ३-२-१११) इति। सूत्रेऽस्मिन् भूते धातोः चेति द्वे पदे अनुवर्त्तेते। ततः अस्य सूत्रस्यार्थः भवति अनद्यतनभूतार्थे लङ्-लकारः स्यात्। जयकृष्णशर्मणा केवलम् अतीतत्वमर्थः स्वीकृतः। तथा च "लङ्लुङोरतीतत्वम्"[40] इति।

'देवदत्तः ग्रामम् अगच्छत्' इत्यत्र ग्रामपदेन ग्रामपदार्थोपस्थितिः। तदुत्तरद्वितीयाविभक्त्या कर्मत्वोपस्थितिः। तत्र कर्मत्वे ग्रामपदस्य वृत्तित्वसम्बन्धेन अन्वयः। तेन ग्रामवृत्तिकर्मत्वमिति। गम्-धातोरर्थः गमनम्। गम्-धातूत्तरलङः अनद्यतनभूतत्वं, कृतिः, एकत्वसंख्या च अर्थः। तादृशकर्मतायाः अनुकूलत्वसम्बन्धेन गमने अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनम् इति। तादृशगमनस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयः। एवं कृतौ अनद्यतनभूतत्वस्यापि अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलानद्यतनभूतकालिककृतिः इति बोधः। देवदत्तपदेन देवदत्तपदार्थोपस्थितिः। कृतेश्च आश्रयतासम्बन्धेन देवदत्ते अन्वयः। एकत्वसंख्यायाः अपि देवदत्ते अन्वयः। तेन एवं बोधः भवति यत्, ग्रामवृत्तिकर्मतानुकूल-गमनानुकूलानद्यतनभूतकालिककृत्याश्रयः एकत्ववान् देवदत्तः इति।

**लिङ्-लकारविवेचनम्—**

लिङ्-लकारस्तु द्विविधः भवति। एकः विधिलिङ् अपरश्च आशीर्लिङ् इति। आदौ तावत् विधिलिङः अर्थः स्पष्टीक्रियते। "विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्" (पा. सू. ३-३-१६१) इति सूत्रेण विध्यादयः अर्थाः बोध्याः। अत्र विधिः इत्युक्ते प्रेरणं, भृत्यादेः निकृष्टस्य प्रवर्तनम्। अर्थात् भृत्यादिनिकृष्टं प्रति प्रभ्वाद्युत्कृष्टानां कार्यकरणाय बलपूर्वकप्रवर्त्तनम्। यथा— प्रभुः भृत्यम् आदिशति यत्, भवान् वस्त्रं प्रक्षालयेत्। निमन्त्रणम् इत्युक्ते नियोगकरणम्। अर्थात् अवश्यम्भावेन यत्करणं तन्निमन्त्रणम्। कश्चित् जनः कञ्चित् ब्राह्मणं निमन्त्रयति यत्, भवान् मम गृहम् आगच्छेत्। आमन्त्रणम् इत्युक्ते कामचारानुज्ञा। अर्थात् स्वस्य इच्छानुसारम् अनुष्ठानाचरणम्। यथा— यथारब्धं कुरुष्व, तत्कुरुष्व यथाहमिति, यथेच्छं कुर्याः इत्यादिप्रयोगः बोध्यः। आमन्त्रणे क्रियमाणेऽपि स्वस्य इच्छानुसारेण कार्याचरणं कर्तुं शक्ष्यते। यतो हि गमनकर्तुः गमनं तु गमनकर्तृनिष्ठेच्छाविषयाधीनम्। गमने अक्रियमाणेऽपि प्रत्यवायः नोत्पद्यते। अधीष्टम् इत्युक्ते सत्कारपूर्वकः व्यापारः। अर्थात् सत्कारपूर्वकम् अध्ययनादिव्यापारे प्रवर्त्तनम् अधीष्टः। यथा— देवदत्तम् अध्यापयेत् भवान्। अतः प्रवर्त्तनासत्त्वात् प्रकृतवाक्ये लिङ्-लकारस्य प्रयोगः भवति।

MEDHĀMANTHAN ISSN : 3139-7840
A premier peer-reviewed, open-access, bimonthly online research journal
dedicated to the fields of Arts, Humanities, and Social Sciences
Volume: 1, Issue: 1 (MAY - JUN) 2026

सम्प्रश्नः इत्युक्ते सम्प्रधारणम्। एतादृशं कार्यं कर्तुं न शक्नुयाम् उत तादृशं कार्यं कर्तुं न शक्नुयाम् इत्येतादृशं चिन्तनं सम्प्रधारणपदवाच्यम्। यथा— 'किं भोः व्याकरणं भवानधीयीय उत तर्कम्' इति। प्रार्थना इत्युक्ते ईप्सितं वस्तु प्राप्त्यर्थं स्वामिनां सकाशे याचनम्। यथा— 'भवान् अन्नं मे दद्यात्' इत्यत्र स्वामी मदभिलषितवस्तुनः अन्नस्य दानं कुर्यात् इति इच्छायाः प्रकटनकरणाय विधिलिङः प्रयोगः भवति। आचार्यः जगदीशः लिङं वर्णयितुमाह—

"लङ्लोडन्या विधेर्बोधसमर्था तिङ् लिङुच्यते।
प्रवर्त्तकचिकीर्षाया हेतुधीविषयो विधिः"॥[41] इति।

एवं तत्रैव अस्य श्लोकस्य अर्थः स्पष्टीकृतः— विध्यन्वयबोधं प्रति समर्था लटो लोटश्च भिन्ना तिङ् लिङुच्यते। विधिस्तु नेह कृत्यात्मकं विधानमाख्यातमात्रस्य तद्बोधसमर्थत्वात्, किन्तु प्रवर्त्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा, तादृशश्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवदनिष्टाननुबन्धित्वञ्च प्रत्येकमेव, यागपाकादि-धर्मिकतन्निश्चयादेव यागादिधर्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेः, एवञ्च यजेत पचेतेत्यादौ यागः कृतिसाध्यम् इष्टसाधनं बलदवदनिष्टाननुबन्धी च इत्याकारको बोधः। पटमानय इत्यादौ सप्तमं पदं गृह्णातीत्यादौ च विधिं बोधयन्त्यावपि लोड्टौ न ताभ्यं भिन्ने, यष्टव्यं, देयमित्यादौ तु तव्यादिकं कार्यत्वादिकं बोधयदपि न तिङ्। पङ्गुः समुद्रं न तरेदित्यादौ नञादिना समुद्रतरणादेः पङ्गुप्रभृतिकृति-साध्यत्वनिषेधबोधानुरोधादवश्यं कृतिसाध्यत्वं लिङर्थः।

आशीर्लिङः अर्थस्तु "आशिषि लिङ्लोटौ" (पा. सू. ३-३-१७३) इत्यनेन सूत्रेण बोध्यः। अस्य सूत्रस्य अर्थस्तावत् आशिषि अर्थे लिङ्-लकारस्य प्रयोगः भवति। अतः अत्र लिङा आशीर्लिङ्[42] इति ज्ञेयम्।

वस्तुतः लोटः, लेटः, लिङश्च एकस्मिन्नेवार्थे विधानं भवतीति कृत्वा भूषणसारादिग्रन्थे त्रयाणां लकाराणामर्थः समान एवेति कृत्वा त्रिभिः सहैव निरूपणं कृतम्। पुनश्च विधिनिमन्त्रणादिचतुर्ष्वपि प्रवर्तनात्वं वर्तते। तस्मात् विध्यादिभिन्नतया स्वीकारापेक्षया लाघवात् चतुर्षु शक्यतावच्छेदकत्वं प्रवर्त्तनात्वम्। प्रवर्त्तनात्वञ्च प्रवृत्तिजनकज्ञानविषयतावच्छदेकत्वम्। तच्चेष्टसाधनत्वस्यास्ति स एव विध्यर्थः। तदुक्तं भर्तृहरिणा—

"अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि।
तत्रैव लिङः विधातव्यः किं भेदस्य विवक्षया"॥[43] इति।

**लुङ्-लकारविवेचनम्—**

लुङ्[44]-लकारस्य कोऽर्थः इति जिज्ञासायामुच्यते "लुङः भूतसामान्यमर्थः"[45] इति। अत्र मानमस्ति— "लुङ्" (पा. सू. ३-२-११०) इति सूत्रम्। सूत्रेऽस्मिन् भूताधिकारे भूतसामान्यार्थे अर्थात् अतीतार्थे लुङ्-लकारः प्रयुज्यते इत्यर्थः आयाति। अत्र भूतत्वं विद्यमानध्वंसप्रतियोगित्वम्। तच्च क्रियायां निर्बाधमिति विद्यमानेऽपि घटे घटः अभूत् इति प्रयोगः स्यात्। एवञ्च विद्यमानध्वंसप्रतियोगी घटाभिन्नाश्रयकः उत्पत्त्यनुकूलः व्यापारः इति बोधः जायते। आचार्यः जयकृष्णशर्मापि लुङ्-लकारस्य अतीतत्वमर्थं स्वीकरोति। तथा च— "लङ्लुङोः अतीतत्वमर्थः"[46] इति।

'देवदत्तः ग्रामम् अगमत्' इत्यत्र ग्रामपदेन ग्रामपदार्थोपस्थितिः। तदुत्तरद्वितीयया कर्मत्वोपस्थितिः। तत्र कर्मत्वे ग्रामस्य वृत्तित्वसम्बन्धेन अन्वयः। तेन ग्रामवृत्तिकर्मता इति बोधः। गम्-धातोः गमनमर्थः। तदुत्तरलुङः अतीतत्वम्, एकत्वसंख्या, कृतिश्चार्थः। तादृशकर्मतायाः अनुकूलत्वसम्बन्धेन गमने अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनम् इति बोधः। तादृशगमनस्य अनुकूलत्वसम्बन्धेन कृतौ अन्वयः भवति। एवञ्च कृतौ अतीतकालस्य अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलातीतकालिककृतिः इति। देवदत्तपदेन देवदत्त-पदार्थोपस्थितिः। तादृशकृतेः आश्रयतासम्बन्धेन देवदत्ते अन्वयः। एवञ्च एकत्वसंख्यायाः अपि देवदत्ते अन्वयः। तेन ग्रामवृत्तिकर्मतानुकूलगमनानुकूलातीत-कालिककृत्याश्रयः एकत्ववान् देवदत्तः इति बोधः जायते।

**लृङ्-लकारविवेचनम्—**

आचार्यः तारानाथ-तर्कवाचस्पतिः लृङर्थमाह– "लृङो भूतत्वं भविष्यत्वं जन्यजनकत्वञ्चार्थः"[47] इति। अत्र सूत्रं मानमस्ति— "लिङ्निमित्ते लृङ् क्रियातिपत्तौ" (पा. सू. ३-३-१३९) इति। अस्मिन् सूत्रे "भविष्यति मर्यादावचनेऽवरस्मिन्" (पा.

सू. ३-३-१३६) इत्यस्मात् सूत्रात् भविष्यति इति पदमनुवर्तते। तेन अस्य सूत्रस्यार्थः कृतः दीक्षितेन— "हेतुहेतुमद्भावादि लिङ्गिमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात्क्रियाया अनिष्पत्तौ गम्यमानायाम्"[48] इति। हेतुहेतुमद्भावः "हेतुहेतुमतोर्लिङ्" (पा. सू. ३-३-१५६) इति सूत्रेण निर्दिष्टः। एवं सति लृङः अर्थः भविष्यत्त्वं, हेतुहेतुमद्भावः, अतिपत्तिश्चेति। क्रियातिपत्तिरित्यस्य अर्थः क्रियाया अतिपत्तिरतिक्रमेण पतनं सम्भावनं, यद्देशे यत्काले वा यत्क्रियायाः सम्भवः तदन्यस्मिन् देशे काले वा तत् सम्भावनं प्रसञ्जनमिति। अर्थात् क्रियायाः इत्युक्ते धात्वर्थस्य यस्मिन् काले देशे वा अस्तित्वम् उपलभ्यते, तदन्यस्मिन् काले इत्युक्ते तद्भिन्नदेशे तद्भिन्नकाले वा तस्याः क्रियायाः प्रसञ्जनम् इत्युक्ते अपादानम् एव क्रियातिपत्तिः। अतीतकालेऽपि लृङः प्रयोगः भवति। अतः आचार्यः कौण्डभट्टः आह— "सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः"[49] इति। आचार्यः जयकृष्णशर्मापि आह लृङः[50] अर्थे— "लृङोऽतीतत्वं क्रियातिक्रमश्च"[51] इति।

'यदि वर्षसहस्रमजीविष्यं तदा पुत्रशतमजनयिष्यम्' इत्यत्र त्रिषु अर्थेषु मध्ये हेतुहेतुमद्भावस्य धात्वर्थक्रियायामन्वयः भवति। भविष्यत्वस्य च कृत्यर्थकाख्यातस्थले कृतौ आश्रयत्वाख्यातस्थले च धात्वर्थे अन्वयः। क्रियातिपत्तिरूपे अर्थे धात्वर्थस्य विशेषणतया अन्वयः। क्रियातिपत्तिरूपस्य अर्थस्य च प्रथमान्तार्थे विशेष्यतया अन्वयः। यदि-शब्दस्य अनिर्द्धारितकालविशेषवृत्तिः इत्यर्थः। तस्य च क्रियायाम् अन्वयः। द्वितीयायाः अत्यन्तसंयोगो व्यापकत्वं निरूढलक्षणया अर्थः। तेन अनिर्द्धारितकालविशेषवृत्ति-भविष्यद्धेतुभूतसहस्रवर्षव्यापक-जीवनप्रकारकसम्भावना-विषयः अहं, तत्कालीन-भविष्यत्कार्य्यीभूतशतपुत्र-कर्म्मोत्पत्त्यनुकूल-व्यापारप्रकारक-सम्भावनाविषयः इति बोधः। यदि अहं सहस्रवर्षव्यापकजीवनवान् स्यां, तदा तादृशपुत्रकर्मकोत्पत्त्यनुकूलव्यापारवान् स्याम् इति।

लकारार्थविवेचनावसरे नागेशकौण्डभट्टाभ्यां कालविषयः उक्तः। स च अत्र मया संक्षेपेण यथामति उपस्थाप्यते—

**कालस्वरूपविवेचनम्—**

'कल संख्याने गतौ चे'ति धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (पा. सू. ३-१-१३४) इत्यनेन सूत्रेण अच्-प्रत्यये "प्रज्ञादिभ्यश्च" (पा. सू. ५-४-३६) इत्यनेन सूत्रेण अण्-प्रत्यये च कालशब्दः निष्पद्यते। अत्र एवं निर्वचनं स्यात् कलयति आयुः यः सः कालः। पुनश्च णिजन्तात् प्रेरणार्थकात् कालि-धातोः "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" (पा. सू. ३-१-१३४) इत्यनेन सूत्रेण अच्-प्रत्यये कालशब्दः निष्पद्यते। अत्र एवं निर्वचनं स्यात् कालयति सर्वाणि भूतानि यः सः कालः।

वैयाकरणैः शब्दतन्मात्रपरिणामः कालः स्वीकृतः। तथा चोक्तमाचार्येण नागेशेन— "शब्दतन्मात्रपरिणाम एव दिग्वत् कालः"[52] इति। अत्र कालस्य लक्षणं कथं स्यादिति जिज्ञासायां नागेशेनैव प्रोक्तं— "भूतादिव्यवहारासाधारणहेतुत्वम्। सकलपरिणामहेतुत्वम्। चिरक्षिप्रव्यवहारहेतुत्वं च लक्षणम्"[53] इति।

अथवा सूर्यस्य गतिविशेष एव कालः। तथा हि श्रीकृष्णम्भट्टः प्राह— "तथा च सूर्यगतिविशेषः कालः"[54] इति। अस्य काललक्षणस्य प्रमाणं तावत् "कालाः परिमाणिना" (पा. सू. २-२-५) इति सूत्रस्थभाष्यं— "येन मूर्तीनामुपचयाश्चापचयाश्च लक्ष्यन्ते तं कालमित्याहुः। तस्यैव कयाचित् क्रियया युक्तस्याहरिति रात्रिरिति च भवति कयाचित् क्रियया इति। कया क्रियया आदित्यगत्या। तयैवासकृदावृत्तया मास इति संवत्सर इति च भवति"[55] इति। एवम् आचार्यः भर्तृहरिरपि प्राह—

"मूर्त्तीनां तेन भिन्नानाम् आचयापचयाः पृथक्।
लक्ष्यन्ते परिणामेन सर्वासां भेदयोगिना"॥[56] इति।

**कालभेदविवेचनम्—**

यद्यपि कालः नित्यः विभुश्चैकः[57] तथापि उपाधिभेदेन कालस्य भेदाः वर्त्तन्ते। भूतभविष्यद्वर्तमानभेदात् कालः त्रिविधः। भूतत्वम् इत्युक्ते वर्तमानध्वंसप्रतियोगित्वम्। अत्र एवं वक्तव्यं पूर्वक्षणवृत्तिकालः भूतकालः। वर्तमानध्वंसः ध्वस्तपूर्वक्षणवृत्तिकालस्य, तत्प्रतियोगित्वं पूर्वक्षणवृत्तिकाले इति। भविष्यत्त्वञ्च वर्तमानप्रागभावप्रतियोगित्वम्। अत्र एवं वक्तव्यम् अग्रिमक्षणवृत्तिकालः भविष्यत्कालः। वर्तमानप्रागभावः उत्पत्स्यमानाग्रिमक्षणवृत्तिकालस्य, तत्प्रतियोगित्वमग्रिमक्षण-वृत्तिकाले। वर्तमानत्वञ्च भूतभविष्यद्भिन्नत्वम्। अर्थात् इदानीन्तनक्षणवृत्तिकालः, तस्य च भूतभविष्यद्भिन्नत्वात्सिद्धं वर्तमानत्वम्।

एवं कालः त्रिविधोऽपि अवान्तरभेदात् एकादशविधः भवति। तथा च भर्त्तृहरिणा प्रोक्तं—

"भूतः पञ्चविधस्तत्र भविष्यंश्च चतुर्विधः।

वर्तमानो द्विधा ख्यात इत्येकादश कल्पनाः"॥[58] इति।

सामान्यभूतः, अनद्यतनभूतः, अतिदिष्टभूतः, क्रियातिपत्तिभूतः परोक्षानद्यतनभूतश्चेति भूतकालस्य पञ्च भेदाः सन्ति। सामान्यभविष्यत्, अनद्यतनभविष्यत्, अतिदिष्टभविष्यत् क्रियातिपत्तिभविष्यच्चेति भविष्यत्कालस्य चत्वारः भेदाः सन्ति। वर्तमानः अतिदिष्टवर्तमानश्चेति वर्तमानकालस्य द्वौ भेदौ स्तः। एवं कालः एकादशविधः। परन्तु मुख्यतः कालः भूतभविष्यद्वर्तमानभेदात् त्रिविध एव।

**नागेशभट्टमते भूतकालविवेचनम्—**

भूतकालविषये आचार्यस्य नागेशभट्टस्य मतमस्ति– "भूतत्वञ्च वर्तमानध्वंसप्रतियोगिक्रियोपलक्षिततत्वम्"[59] इति। अर्थात् वर्तमाने ध्वंसः इति वर्तमानध्वंसः, तस्य प्रतियोगिनी इति वर्तमानध्वंसप्रतियोगिनी, वर्तमानध्वंसप्रतियोगिनी सा च क्रिया इति वर्तमानध्वंसप्रतियोगिक्रिया, तया उपलक्षितः इति वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितः, तस्य भावः इति वर्तमानध्वंसप्रतियोगिक्रियो-पलक्षिततत्वम्। अस्य लक्षणस्य अर्थस्तावत्– वर्तमाने यो ध्वंसः विद्यते, तस्य वर्तमानध्वंसस्य प्रतियोगिनी या क्रिया, तया क्रियया निर्दिष्टः यः कालः स एव भूतकालः। लक्षणस्य समन्वयो भवति यत्, वर्तमाने काले यः ध्वंसः, तस्य प्रतियोगिनी या सत्तादिरूपक्रिया, तया सत्तादिक्रियया निर्दिष्टः यः कालः स एव भूतकालपदवाच्यः बोध्यः। उदाहरणेन स्पष्टीक्रियते— 'घटः आसीत्' इत्यत्र वर्तमानकाले घटकर्तृकसत्तारूपक्रियायाः अभावः अनुभूयते। अत एव एतादृशस्य अभावस्य प्रतियोगिनी सत्तारूपाक्रिया, तया घटकर्तृकसत्तारूपक्रियया उपलक्षितः यः कालः स भूतकालः।

**कौण्डभट्टमते भूतकालविवेचनम्—**

भूतकालविषये आचार्यस्य कौण्डभट्टस्य मतमस्ति– "तत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम्"[60] इति। अस्य लक्षणस्य अर्थोऽयं विद्यमानकालिकः यः ध्वंसः अतीतक्रियाध्वंसः, तादृशध्वंसप्रतियोगिनी या अतीतक्रिया, तस्यां प्रतियोगित्वसत्त्वात् वर्तमानध्वंसप्रतियोगिक्रियाश्रयकालत्वं भूतत्वमिति। वर्तमानायाम् आगामिन्यां च क्रियायां भविष्यत् ध्वंसप्रतियोगित्वसत्त्वेन तत्रातिव्याप्तिवारणाय विद्यमानेति लक्षणे प्रोक्तम्। एवमपि वक्तुं शक्यते वर्तमानकालात् भविष्यत्कालात् भिन्नः कालः भूतकालः। तथा हि वर्तमानभविष्यद्भिन्नत्वं भूतत्वम्। यथा 'घटः अभवत्' इत्यत्र घटकर्तृकसत्ता विद्यमानकालभिन्ने भविष्यत्कालभिन्ने च भूतकाले विद्यते।

**नागेशभट्टमते भविष्यत्कालविवेचनम्—**

भविष्यत्कालविषये शास्त्रेषु बहवः विद्वांसः बहुविधानि लक्षणानि उक्तवन्तः। तत्र आचार्यः नागेशभट्टः आह— "भविष्यत्वं वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वम्"[61] इति। अर्थात् वर्तमानकालिकः यः प्रागभावः सः भविष्यत्क्रियायाः अभावः, तत्प्रतियोगिनी उत्पत्तिर्यस्य सः वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकः, तस्य भावः वर्त्तमानप्रागभाव-प्रतियोग्युत्पत्तिकत्वमिति। एवञ्च वैयाकरणसिद्धान्तमञ्जूषायामपि भविष्यत्कालस्य लक्षणं नागेशाचार्येण उक्तं— "भविष्यत्वञ्च वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिकत्वम्"[62] इति।

**कौण्डभट्टमते भविष्यत्कालविवेचनम्**

आचार्यः कौण्डभट्टः भविष्यत्कालं लक्षयति— "वर्त्तमानप्रागभावप्रतियोगि-समयोत्पत्तिमत्त्वम्"[63] इति। अर्थात् वर्तमानो यः प्रागभावः विनाशभावः तस्य प्रतियोगी विरोधी यः समयः तत्रोत्पत्तिः सास्ति यस्यासौ वर्तमानप्रागभावप्रतियोगि-समयोत्पत्तिमान्, तत्त्वं भविष्यत्त्वमिति बोधः। अर्थात् वर्तमानः यः प्रागभावः आगामिसमयस्य प्रागभावः, तस्य अभावस्य प्रतियोगी समयः, आगामिसमयः, तस्मिन् समये उत्पन्ना या क्रिया, तस्य अधिकरणीभूतः यः कालः स भविष्यत्कालपदवाच्यः। यथा 'चैत्रः ओदनं पक्ष्यति' इत्यत्र वर्तमानप्रागभावः भविष्यत्पाकक्रियायाः कालस्य प्रागभावः, तस्य प्रतियोगिसमयः भविष्यत्पाकक्रियायाः समयः, उत्पत्स्यमाना या पाकक्रिया, तदधिकरणीभूतः कालः भविष्यत्कालः इति। अस्मिन् लक्षणे

वर्त्तमानपदाभावे पाकानुकूलवर्तमानकृतिदशायां 'पक्ष्यति' इति प्रयोगापत्तिः स्यात्। यतो हि तादृशवर्तमानकृतेः पूर्वकालावच्छेदेन आत्मनि प्रागभावसत्त्वेन प्रागभावप्रतियोगित्वस्य विद्यमानात्। 'पचति' इत्युक्ते फूत्कारत्वाधःसन्तापनत्व-यत्नत्वादिव्यापारसमूहः। अत एव 'पचति' इत्यनेन अधिश्रयणक्रियारभ्य अधःसन्तापनपर्यन्तं क्रियासमूहः बोध्यते। हरिणा प्रोक्तं—

"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पताभेदः क्रियेति व्यपदिश्यते"॥[64] इति।

अतः भविष्यत्काललक्षणे वर्तमानपदाभावे सति पाकानुकूलवर्तमान-कृतिदशायामपि प्रागभावप्रतियोगित्वस्य विद्यमानात् 'तण्डुलं पचति' इति प्रयोगस्थले 'तण्डुलं पक्ष्यति' इत्यपि व्यवहारापत्तिः स्यात्, तद्वारणाय वर्तमानपदग्रहणं कृतम्। तेन 'तण्डुलं पचति' इत्यत्र वर्तमानकालिकप्रागभावस्य प्रतियोगित्वं नैव वर्त्तते, वर्तमानकालावच्छिन्नकृतेः विद्यमानात्।

**नागेशभट्टमते वर्तमानकालविवेचनम्—**

वर्तमानकालविषये आचार्यः नागेशभट्टः आह— "वर्तमानकालत्वञ्च प्रारब्धापरिसमाप्तक्रियोपलक्षिततत्वम्"[65] इति। अर्थात् प्रारब्धा च अपरिसमाप्ता च या क्रिया, तादृशक्रियोपलक्षिततत्वमिति। उपलक्षिततत्वमित्युक्ते आश्रयत्वमिति। तथा च प्रारब्धापरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वमिति। यथा— 'देवदत्तः पचति' इत्यत्र पाकानुकूला क्रिया प्रारब्धा परन्तु नैव परिसमाप्ता, तादृशक्रियायाः आश्रयभूतः कालः वर्तमानकालः इति।

**कौण्डभट्टमते वर्तमानकालविवेचनम्—**

आचार्यः कौण्डभट्टः वर्तमानकालं लक्षयति— "प्रारब्धापरिसमाप्तत्वं भूतभविष्यद्भिन्नत्वं वा वर्तमानत्वम्"[66] इति। एवं वैयाकरणभूषणसारे आचार्येण कौण्डभट्टेन वर्तमानकालस्य लक्षणद्वयमुपस्थापितम्। वर्तमानकालस्य प्रथमं लक्षणं तावत्— प्रारब्धापरिसमाप्तत्वमिति। अस्यार्थो भवति प्रारब्धापरिसमाप्तक्रियोप-लक्षिततत्वमिति। अर्थात् प्रारब्धा च अपरिसमाप्ता च या क्रिया, तादृशक्रियोपलक्षिततत्वमिति। अत्रापि उपलक्षिततत्वम् इत्युक्ते आश्रयत्वमिति बोध्यम्। तेन प्रारब्धापरिसमाप्तक्रियाश्रयत्वं वर्तमानत्वमिति निष्कर्षोऽर्थः। यथा— 'देवदत्तः पचति' इत्यादौ पाकानुकूलक्रिया प्रारब्धा, परन्तु नैव परिसमाप्ता, तादृशक्रियायाः आश्रयभूतः यः कालः स एव वर्तमानकालः। द्वितीयं तावत्— भूतभविष्यद्भिन्नत्वमिति। भूतत्वं नाम विद्यमानध्वंसप्रतियोगित्वम्, भविष्यत्वं नाम वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिमत्त्वम्, एतदुभयभिन्नत्वं वर्तमानत्वमिति भावः।

## Endnotes

1. वै. सि. कौ. (पृ. सं.– ७७)।
2. नि. (१/१)।
3. वै. सि. ल. म. (पृ. सं.– ७८७)।
4. श. श. प्र. (श्लो. सं.– ९७)।
5. श. श. प्र. (पृ. सं.– ३९५)।
6. श. श. प्र. (श्लो. सं.– ९५)।
7. वै. भू. सा. (श्लो. सं.– २२)।
8. वै. भू. सा. (श्लो. सं.– २३)।
9. श. श. प्र. (श्लो. सं.– ९८)।
10. श. सा. म. (पृ. सं.– ६५)।
11. श. र. (प. का.)– पृ. सं.– ८७।
12. प. ल. म. (पृ. सं.– १८६)।
13. वै. भू. सा. (पृ. सं.– १२१)।
14. म. भा. (पा. सू. ३-२-१२३)।

15. वा. प. (३/९/८०)।
16. द्विरुक्तभिन्नधात्वर्थे स्वार्थस्यान्वयबोधने। या न योग्या तादृशी तिङ् लिङ्देनाभिधीयते॥ (श. श. प्र., श्लो. सं.–१०४)।
17. श. र. (प. का.)– पृ. सं.– ८८।
18. तदेव।
19. वै. भू. सा. (पृ. सं.– १२६)।
20. प. ल. म. (पृ. सं.– १८८)।
21. वै. सि. ल. म. (पृ. सं.– ८५३)।
22. श. र. (प. का.)– पृ. सं.– ८८।
23. श. र. (पृ. सं.– ८८)।
24. प. ल. म. (व. टी.)– पृ. सं.– १५५।
25. श. सा. म. (पृ. सं.– ६५)।
26. श. श. प्र. (श्लो. सं.– १०६)।
27. क्रियातिपाते कालस्य भाविनः प्राक्तनस्य च। वैशिष्ट्यबोधिका या तिङ् लृट् च लृङ् च क्रमादिमे॥ श. श. प्र.– (श्लो. सं.– १०७)। (या तिङ् क्रियाया धात्वर्थस्यातिपाते विगमे भाविकालावच्छेद्यत्वस्य बोधिका तादृशी लृट्, या त्वतीतकालावच्छेद्यत्वस्य तादृशी लृङ्)।
28. श. र. (प. का.)– पृ. सं.– ८८।
29. प. ल. म. (पृ. सं.– १८९)।
30. श. सा. म. (पृ. सं.– ६५)।
31. श. र. (प. का.)– पृ. सं.– ८९।
32. श. र. (प. का.)– पृ. सं.– ८९।
33. प. ल. म. (पृ. सं.– १९०)।
34. श. र. (प. का.)– पृ. सं.– ८९।
35. वै. सि. कौ. (पृ. सं.– ३२)।
36. स्ववक्त्रनुमतत्वस्य धात्वर्थेऽन्वयबोधने। अनुकूला यादृशीं तिङ् सैव लोट् परिभाष्यते॥ श. श. प्र.– (श्लो. सं.– १००)।
37. श. सा. म. (पृ. सं.– ६५)।
38. या स्मयोगे विना धातोः शपन्तस्यार्थधर्मिके। अतीतत्वग्रहे हेतुस्तादृशी तिङ् लङुच्यते॥ श. श. प्र.– (श्लो. सं.– १०२)। (स्मशब्दस्य योगं विना शपन्तस्य धातोर्थेऽतीतत्वस्यान्वयधीहेतुर्यादृशी तिङ् तादृशी तिङ् लङ् उच्यते)।
39. श. र. (प. का.)– पृ. सं.– ८९।
40. श. सा. म. (पृ. सं.– ६५)।
41. श. श. प्र. (श्लो. सं.– १०१)।
42. आशीर्लिङाशंसनस्य भावित्वस्य च बोधिका। श. श. प्र.– (श्लो. सं.– १०६)।
43. सम्प्रति वाक्यपदीये नावलोक्यते। प. ल. म. (पृ. सं.– १९१)।
44. हन्तेः कृतवधेरर्थे याऽतीतत्वस्य बोधिका। सिजन्तस्याथवा धातोस्तादृशी तिङ् लुङोच्यते॥ श. श. प्र.– (श्लो. सं.– १०३)।
45. श. र. (प. का.)– पृ. सं.– ९१।
46. श. सा. म. (पृ. सं.– ६५)।
47. श. र. (प. का.)– पृ. सं.– ९१।
48. वै. सि. कौ. (पा. सू. ३-३-१३९)।
49. वै. भू. सा. (पृ. सं.– ९४)।
50. क्रियातिपाते कालस्य भाविनः प्राक्तनस्य च। वैशिष्ट्यबोधिका या तिङ् लृट् च लृङ् च क्रमादिमे॥ श. श. प्र.– (श्लो. सं.– १०७)।
51. श. सा. म. (पृ. सं.– ६५)।
52. वै. सि. म. (पृ. सं.– ८४०)।

53. वै. सि. म. (पृ. सं.– ८४०)।
54. श. त. मृ. (पृ. सं.– २५)।
55. वै. सि. म. (पृ. सं.– ८४८)।
56. वा. प. (३/९/१३)।
57. व्यापारव्यतिरेकेण कालमेके प्रचक्षते। नित्यमेकं विभु द्रव्यं परिमाणं क्रियावताम्॥ वा. प. (३/९/१)।
58. वा. प. (३/९/३८)।
59. प. ल. म. (पृ. सं.– १९४)।
60. वै. भू. सा. (पृ. सं.– १४४)।
61. प. ल. म. (पृ. सं.– २०६)।
62. वै. सि. म. (पृ. सं.– ९८)।
63. वै. भू. सा. (पृ. सं – १२९)।
64. वा. प. (३/८/४)।
65. प. ल. म. (पृ. सं.– १८६)।
66. वै. भू. सा. (पृ. सं.– १२१)।

**Bibliography**


- Jayakṛṣṇaśarmā. (2008). *Śabdārthasāramañjarī* (A. K. Bandyopadhyaya, Ed.). Sadesh. [In Bengali].
- Kauṇḍabhaṭṭa. (2009). *Vaiyākaraṇabhūṣaṇasāra*. Bhaimi Prakashan. [In Sanskrit].
- Nāgeśabhaṭṭa. (1990). *Vaiyākaraṇasiddhāntamañjūṣā* (R. Tripathi, Ed.). Sampurnananda Sanskrit Vishwavidyalay. [In Sanskrit].
- Nāgeśabhaṭṭa. (2011). *Paramalaghumañjūṣā* (L. Dahal, Ed.; Reprint ed.). Chowkhamba Surabharati Prakashan. [In Sanskrit].
- Nāgeśabhaṭṭa. (2014). *Paribhāṣenduśekhara* (V. Mishra, Ed.). Chowkhamba Surbharati Prakashan. [In Sanskrit].
- Parecattil, J. (2013). *Śabdātharatna of Tārānātha Tarkavācaspati: A Critical Study with English Translation*. Pratibha Prakashan. [In English].
- Shastri, G. (1959). *The Philosophy of Word and Meaning*. Sanskrit College. [In English].


———